International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(4): 159-162
© 2020 IJSR
www.anantaajournal.com
Received: 12-05-2020
Accepted: 15-06-2020

डॉ. प्रवीण कुमार चौधरी
व्याकरणविभागे अतिथि-अध्यापक:
केन्द्रीयसंस्कृतवि.वि., लखनऊ-परिसरे गोमतीनगरम्, विशालखण्ड:, उत्तर प्रदेश, भारत

**Corresponding Author:**
डॉ. प्रवीण कुमार चौधरी
व्याकरणविभागे अतिथि-अध्यापक:
केन्द्रीयसंस्कृतवि.वि., लखनऊ-परिसरे गोमतीनगरम्, विशालखण्ड:, उत्तर प्रदेश, भारत

# अष्टाध्याय्या: पदानामनुवर्त्तनशैली

डॉ. प्रवीण कुमार चौधरी

## प्रस्तावना

प्रसिद्धमिदं यत् समग्रमपि व्याकरणशास्त्रं सम्बद्धतत्त्वञ्चानुयाति आकांक्षादिवशात् महावाक्यमिवसम्बद्धमुत्तरत्रानुवर्तते उत्तरतोऽपि अपकर्षणविधिना परस्परसम्बधं स्थापयति। यथा "अष्टाभ्य औश्" [1] इत्यत्र "रायो हलि" [2] इत्यत: हलि इत्यपकृष्यते क्वचित् चकारेणापि पदानि परस्परं सम्बन्धं दृढीकुर्वन्ति। तदेवोक्तमधिकारो नाम त्रिप्रकार: क्वचित् एकदेशस्य क्वचित् चकारेणापकृष्यते इति। एतदेव चोत्कृष्टं नोत्तरत्वमित्यनया परिभाषया सामञ्जस्यमुपैति व्याकरणे सूत्राणां षड्विधत्वं सुप्रसिद्धं तच्च संज्ञापरिभाषाविधिनियमादिरूपम्। अत: परस्परं सम्बन्धस्थापनाय संज्ञाबोधकानां पदानामपि अनुवर्तनं समवलोकितम्। यथा "वृद्धिर्यस्याचामादिश्तद् वृद्धम्" इत्यत: अनुवृत्तं वृद्धपदम् "एङ्प्राचां देशे" इत्यादिषु सम्बद्धयते। अधिकारबोधकानि अन्यपदानि उत्तरत्रानुयान्ति। यथा- "कर्मप्रवचनीया:" इत्यत: "अनुर्लक्षणे" [3], "तृतीयार्थे" [4], "हीने" [5], "उपोधिके च" [6] इत्यत्र कर्मप्रवचनीयेन इति सम्बन्ध: स्पष्ट:। संज्ञाबोधकानि पदानि उपदेशस्थले स्वरूपबोधकानि भवन्ति। परन्तु अनुवृत्तस्थले संज्ञिबोधकानि भवन्ति। यथा- कश्चिदपि कर्मकार: लोमादिवशात् सुयोग्ये सम्बन्धे स्वकीयां स्थापनां करोति तथैव अत्रापि अवगन्तव्यत्। यथा- "ष्णान्ता षट्" [7] इत्यत्र संख्यापदं संज्ञिभूतं भवति, तथैव तस्योद्देश्यता। अत एव "इको गुणवृद्धि" [8] इत्यत्र पूर्वसूत्राभ्याम् अनुवर्तमाने गुणवृद्धिपदे संज्ञितया बोध्येते। अत्र अनुवृत्तिसूचकं सूत्रं "स्वरितेनाधिकार:" [9] इत्येव अनुवृत्ति: कथं करणीया? इति विषये अस्य स्पष्टं महात्म्यम् अवलोक्यते। अत्र स्वपदेन सङ्केतविशेष: ज्ञातव्य:, न तु अपस्वरा: इति प्रसिद्ध: स च स्वर: व्यवहारात् अनुमेय:। तदेवोक्तं सिद्धान्तकौमुद्यां स्वरितेन अधिकृतं बोधव्यमिति। अथवा स्वरितेन अधिक: कार: इत्योऽपि अर्थोऽनुसन्धेय:। अत एव शब्दाधिकारसिद्धि: तत् फलमपि बहुधा शास्त्रे विमृष्टम्। इदानीं यथापूर्वं व्याख्यातं यत् षड्विधानि सूत्राणि तेषामनुवृत्तिप्रकार: अनुवृत्तौ च पदानां परस्परं कथं सम्बन्ध:? इति विचारणीयो भवति। तस्मात्। इह यथा प्रकरणमधिकारबोधकानि पदानि तस्य सम्बन्धाश्च निरुप्यन्ते। संज्ञा तत् प्रथमं संज्ञाबोधकपदानि- "ईदूदेद्द्विवचनं प्रगृह्यम्" [10] ईदूदेद्द्विवचनं प्रगृह्यसंज्ञं स्यादिति सूत्रार्थ:। व्याख्या-ईच्च उच्च एच्चेति समाहारद्वन्द्वे ईदूदेदिति प्रथमान्तम्। ईदूदेदिति तच्च द्विवचनस्य विशेषणम् "येन विधिस्तदन्तस्य" [11] इति तदन्तस्य संज्ञा। तदाह- ईदूदेदन्तमिति ईदन्तम्, ऊदन्तम्, एदन्तमित्यर्थ:। द्विवचनस्य प्रत्ययबोधकत्वेन प्रत्ययग्रहणे यस्मात् इति परिभाषया तदादीत्यस्योपस्थित्या ईदूदन्ते यद् द्विवचनान्तं तत्प्रगृह्यमित्यर्थीस्तु न "संज्ञाविधौ प्रत्ययग्रहणे" इति परिभाषया तदन्तविधेर्निषेधात् कुमार्य्योरगारं बध्वोरगारमित्यादौ दोषाच्च। तथा हि कुमार्य्यगारमित्यत्र षष्ठीसमासे ओसो लुकि "कुमारी अगारम्" इत्यवस्थायामीदन्तं कुमारीति प्रत्ययलक्षणेन ओसमादाय द्विवचनान्तं चेति प्रगृह्यत्वाप्राप्ति: स्यात्। अत ईदूदेदन्तं प्रगृह्यमित्येवार्थो न तु द्विवचनान्तमिति। ईदाद्यन्तं द्विवचनमित्यर्थे तु नात्र प्रगृह्यत्वम् आस: सान्तत्वात् एवं वध्वगारमित्यत्रापि। विशेष:- सूत्रेणानेन प्रगृह्यसंज्ञा विधीयते प्रगृह्यं प्रकृत्या गतो ऊच्चार्यते यत्पदं तत्प्रगृह्यम्। प्रगृह्यत्वादेव अग्नी इति, वायू इति, खट्वे इति, पचेते इति अत्र सर्वत्र सन्धेरभावो दृश्यते।

"अदसो मात्" [12] सूत्रस्यास्य वृत्तिं कुर्वता कौमुदीकृता इत्थं विलिखितम्- अस्मात्परावीदूतौ प्रगृह्यौ स्त:। यथा- अमी ईशा, रामकृष्णावमू आसाते। मात्किम्? अमुकेऽत्र, असति माद्ग्रहणे एकारोप्यनुवर्तेत।

सूत्रेऽस्मिन् ''ईदूदेद्द्विवचनं प्रगृह्यम्'' इत्यतः ईदूदिति प्रगृह्यमिति चानुवर्तते न तु एदित्यपि, अदस् शब्दे एकारस्य मात्परत्वं नास्ति, अतः एकारोऽत्र नानुवर्तते। एवमेव द्विवचनमपि नानुवर्तते यतो हि अमी ईशाः इत्यादौ बहुवचनान्ते प्रगृह्यत्वनुपत्तेः। केचिद् आक्षिपन्ति अदस् इत्येव सूत्रमस्तु माद्ग्रहणं कथम्? अमुकेऽत्र यदि माद्ग्रहणं नैव क्रियेत् चेत् अत्रापि प्रगृह्यत्वानापत्तिः स्यात्। अत एव एकारस्य प्रगृह्यत्वनिवृत्त्यर्थं माद्ग्रहणं कृतम्।

''शे'' [13] सूत्रस्यास्य वृत्तिं कुर्वता कौमुदीकारेण एवं विलिखितम्- अयं प्रगृह्यः स्यात्। यथा- अस्मे इन्द्राबृहस्पति, सूत्रमिदमेकपदम्। प्रगृह्यमित्यनुवर्तते, शे इति लुप्तप्रथमान्तो निर्देशः। ''सुपां सुलुक्यपूर्वसवर्णाच्छे'' [14] इत्यनेन छान्दस आदेशो गृह्यते। अस्मे इन्द्राबृहस्पति, युस्मे इति, अस्मे इति, त्वे इति, मे इति, अत्र सर्वत्र अद्विवचनत्वाद् ''ईदूदेद्द्विवचनं प्रगृह्यम्'' इत्यनेन सूत्रेण प्रगृह्यसंज्ञा अप्राप्ता अतः प्रकृतसूत्रेण प्रगृह्यसंज्ञा विधीयते।

''निपात एकाजनाङ्'' [15] सूत्रस्यास्य वृत्तिं कुर्वता कौमुदीकृता एवं विलिखिता- एकोऽज्निपातः आङ्वर्जः प्रगृह्यं स्यात्। इ विस्मये, उ वितर्के, इ इन्द्र, उ उमेशः। अनाङित्युक्तेरङिदाकारः प्रगृह्य एव। आ एवं नु मन्यसे, आ एवं किल तत्। ङित्तु न प्रगृह्यः, ईषदूष्णम् ओष्णम्, वाक्यस्मरणयोरङित्, अन्यत्र ङित् इति विवेकः। सूत्रेऽस्मिन् प्रगृह्यमिति ''ईदूदेद्द्विवचनं प्रगृह्यम्'' इत्यतः प्रगृह्यमनुवर्तते तच्च पुल्लिङ्गतया विपरिणम्यते। निपातः- निपतन्त्यनेकेऽर्था यत्रासौ निपातः। बाहुलकाधिकरणे घञ्। एकश्चासौ अच्च-एकाच इत्यत्र कर्मधारयः तथा न आङ्- अनाङ् इत्यत्र नञ्तत्पुरुषः। इ इन्द्रः, उ उमेशः, इ इति चादित्वान्निपातः तथैव उ इत्यपि, इ उ इति निपातः सम्बोधने उभयोरपि एकाचत्वान्निपातत्वाच्च प्रगृह्यत्वान्न सन्धिः। इतः आरभ्य ओत् इत्यन्तं यावत् निपातः अनुवर्तते।

''ओत्'' [16] सूत्रस्यास्य वृत्तिं कुर्वता दीक्षितेन इत्थं कृता- ओदन्तो निपातः प्रगृह्यः स्यात् यथा- अहो ईशाः। सूत्रेऽत्र निपातः प्रगृह्यमिति च अनुवर्तेते। ओदिति। तस्य विशेषणमतस्तदन्तविधिः। अत्रापि अनुवर्तमानं प्रगृह्यं पुल्लिङ्गतया विपरिणम्यते। अहो ईशाः इत्यत्र ''निपात एकाजनाङ्'' इति सूत्रेण अनेकाच्त्वात् अप्राप्तौ पृथक् सूत्रं भगवता पाणिनिना सूत्रितम्।

इतः आरभ्य ''सम्बुद्धौ शाकल्यस्येतावनार्षे'' इत्यन्तं यावत् आत् इति अनुवर्तते। ''सम्बुद्धौ शाकल्यस्येतावनार्षे'' [17] सूत्रस्यास्य वृत्तिं कुर्वता कौमुदीकृता एवं विलिखितम्- सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिक इतौ परे। विष्णो इति, विष्ण इति, विष्णवित् अनार्षे किम्? ब्रह्मबन्धवित्यब्रवीत्।

सूत्रेऽस्मिन् ओत्, प्रगृह्यञ्चानुवर्तेते, सम्बुद्धौ इत्यत्र निमित्तसप्तमी तच्च ओदित्यनुवृत्तेन अन्वेति, अनुवृत्तं, प्रगृह्यं पुल्लिङ्गतया विपरिणम्यते। शाकल्यनामधेयः कश्चन आचार्यः आसीत् पाणिनेः प्राक्, ऋषिर्वेदः तदुक्तमृषिणा इत्यादि निर्देशात् अभ्युपगम्यते। विष्णो इति इत्यत्र यद्यपि विष्णो इति पदमोदन्तं परञ्च निपातत्वाभावादप्राप्तौ प्रगृह्यं तत प्रकृतसूत्रेणानेन विधीयते।

''उञः'' [18] सूत्रस्यास्य वृत्तिं कुर्वता श्रीदीक्षितेन एव स्वविरचितवैयाकरणसिद्धान्तकौमुद्यां प्रदर्शिता- उञ इतौ वा प्रागुक्तं यथा उ इति विति। सूत्रमिदमेकपदात्मकम्, शाकल्यस्य इतौ प्रगृह्यमिति चानुवर्तते। निपात एकाच् इति नित्ये प्राप्ते विकल्पार्थमिदं सूत्रम्। उ इति, ञित् उकारः निपातः न तु ''ञभञ्'' ञकारेण प्रत्याहारः प्रतिपदोक्तत्वात्। उञ् ग्रहणसामर्थ्याच्च उ इति वितीति, अत्र विकल्पार्थं सूत्रमिदम्।

''ऊँ'' [19] सूत्रस्यास्य वृत्तिं कुर्वता दीक्षितेन इत्थं विलिखितं कौमुद्याम्- उञ् इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्यत्रादेशो वा स्यात् यथा ऊँ इति विति।

सूत्रमिदमेकपदात्मकम्। उञ् इत्यनुवर्तते, इतौ शाकल्यस्य प्रगृह्यमिति च। ऊँ इतीति उक्तविधे ऊँकारादेशे रूपम्। प्रगृह्यत्वात् प्रकृतिभावः। एतदादेशाभावपक्षे पूर्वसूत्रेण अर्थात् उञः इति सूत्रेण प्रगृह्यत्वे सति उ इतीति रूपम्। प्रगृह्यत्वस्याप्यभावे सति उ इतीति रूपम्। प्रगृह्यत्वस्याप्यभावे सति यणादेशे वितीति रूपमिति त्रीणि फलितानि।

''ईदूतौ च सप्तम्यर्थे'' [20] सूत्रस्यास्य वृत्तिं कुर्वता कौमुदीकारेण इत्थं कृता। सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात् यथा सोमो गौरी अभिश्रितः, मामकी तनू इति ''सुपां सुलुक्पूर्वसवर्णाच्छे'' इति सप्तम्या लुक्। अर्थग्रहणं किम्? वृत्तावर्थान्तरोपसङ्क्रान्ते मा भूत। वाप्यामश्वो वाप्यश्वः। अत्र शाकल्यस्य इतौ अनार्षे इति पदत्रयं निवृत्तं केवलं प्रगृह्यमित्यनुवर्तते। ईच्च ऊच्च= ईदूतौ इतरेतरयोगद्वन्द्वः, सप्तम्या अर्थः सप्तम्यर्थः तस्मिन् सप्तम्यर्थे षष्ठी तत्पुरुषः। सोमो गौरी अधिश्रितः इति अत्र गौर्य्यामितयर्थ सुपां सुलुक् इत्यादिना ङेः लुक् प्रकृतप्रयोगो प्रगृह्यत्वे प्रकृतिभावान्न यण्।

''सर्वादीनि सर्वनामानि'' [21] सूत्रस्यास्य वृत्तिं कुर्वता दीक्षितेन स्वविरचितवैयाकरणसिद्धान्तकौमुद्यामित्थं विलिखतम्- सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः। सर्वस्मात्, सर्वे, सर्वस्मै, सर्वस्मिन्। प्रकृतसूत्रं व्याख्याकृद्भिः एवं व्याख्यातम्।

सर्व आदि प्रथमावयवो येषां समुदायरूपाणां तानि सर्वादीनि समुदायरूपाणि। ननु सर्वघटितसमुदायस्यैकत्वाद् बहुवचनमसङ्गतमिति चेन्न सर्वधर्मसमुदायस्य क्वचिदपि प्रयोगाभावात् ''समुदायेऽवतरन्ती संज्ञा तदवयवे विश्राम्यति'' इति न्यायेन समुदायघटक प्रत्येकं संज्ञा विश्राम्यति इति द्योतनायाऽवगतायाः बहुत्वसंख्यायाः समुदाये आरोपाद् बहुत्वोपपत्तेः। बहुव्रीहिर्द्विविधः- तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च। तत्र तस्यान्यपदार्थस्य गुणाः विशेषणानि=सामान्यपदार्थस्य विशेषणानि-सामान्यपदार्थस्वरूपाणीति तद्गुणाः। तेषां संविज्ञानम्=क्रियान्वयितया विज्ञानं यत्र स तद्गुणसंविज्ञानः। तदुक्तञ्च ''भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि'' तद्यथा शुक्लवाससमानाय लोहितोष्णीषा ऋत्विजः सञ्चरन्ति इत्यत्र तद्गुण आनीयते तद्गुणाच सञ्चरन्ति इति।

अत्र सर्वनाम इति महासंज्ञाकरणात् सर्वार्थवाचकानामेव सर्वनामसंज्ञा। सर्वादिगणपठिताश्चार्थविशिष्टस्वरूपपदा एव अनुकरणत्वात् तेषां सर्वनामत्वे फलाभावाच्च। तस्मात् ''सर्वादीनि सर्वनामानि'' इत्यस्य सर्वादिगणपठितशब्दवृत्त्यानुपूर्वी विशिष्टानि सर्वार्थवाचकानि सर्वनामसंज्ञानि स्युः तदन्तानि चेत्यर्थः। तथा च लक्ष्य घटकसर्वादीनां सर्वनामत्वं सिद्धयति। सर्वत्रगणेन निर्देशे एवमेवार्थो बोध्यः। सर्वनाम इत्यत्र ''पूर्वपदात्संज्ञायाम्'' इति प्राप्तस्य णत्वस्य सर्वादीनि इति निर्देशेनाभावो निपात्यते तदुक्तं भाष्ये-सर्वनामसंज्ञयाः निपातनात् णत्वाभावः। विशेषः इतः सर्वनाम इति पदमनुवर्तते।

''विभाषा दिक्समासे बहुव्रीहौ'' [22] भट्टाजिदीक्षितविरचितसिद्धान्तकौमुद्यां सूत्रस्यास्य वृत्तिः एवमस्ति- अत्र सर्वनामता वा स्यात् यथा- उत्तरपूर्वस्यै,

उत्तरपूर्वायै। दिङ्नामान्यन्तराले इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह। योत्तरा सा पूर्वा यस्या उन्मुधायास्तस्यै उत्तरपूर्वायै बहुव्रीहिग्रहणं स्पष्टार्थम्। अन्तरस्यै शालायै बाह्यायै इत्यर्थः। अपुरीत्युक्तेर्नेह- अन्तरायै नगर्य्यै। अत्र किञ्चिद्विचार्यते, अत्र सूत्रे सर्वनाम इति पदमनुवर्तते। उत्तरपूर्वस्यै, उत्तरपूर्वायै इत्यत्र ''न बहुव्रीहौ'' इत्यनेन सूत्रेण अलौकिकविग्रहवाक्ये नित्यनिषेधे प्राप्ते तत्र विकल्पार्थमिदं सूत्रमित्येके। अपरे च गौणत्वादप्राप्तौ विकल्पार्थमिदं सूत्रम्। अत्र केचित् विभाषा दिक्समासे इत्येवं सूत्रस्वरूपं भवत्विति बहुव्रीहिग्रहणं मास्तु यतः प्रतिपदोक्तत्वेन दिङ्नामानि इति बहुव्रीहिरेव ग्रहणं सिद्धिः।

विशेषः- दिक्समासशब्देन ''दिङ्नामान्यन्तराले'' इति सूत्रेण यः समासस्तस्य ग्रहणम्।

''न बहुव्रीहौ'' [23] बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञकानि न भवन्तीति सूत्रार्थः, प्रियविश्वाय प्रियोभयाय। सूत्रेऽस्मिन् सर्वादीनि सर्वनामानि इत्यनुवर्तते। प्रियसर्वायेत्यादि बहुव्रीहिवर्तिनां सर्वादीनां प्रियोभयाय। सूत्रेऽस्मिन् सर्वादीनि सर्वनामानि इत्यनुवर्तते। प्रियसर्वायेत्यादि बहुव्रीहिवर्तिनां सर्वादीनां स्वार्थोपसङ्क्रान्तार्थान्तरप्रधानकतया उपसर्जनत्वादेव सर्वनामत्वनिषेध सिद्धेः ''संज्ञोपसर्जनीभूतास्तु न सर्वादयः'' इति वक्ष्यमाणत्वात्।

सूत्रमिदं व्यर्थमेव, अत्र सूत्रे बहुव्रीहौ इति विषयसप्तम्याश्च यणाद् बहुव्रीहौ प्रसक्ते सति ततः प्रागेव विग्रहवाक्येऽयं निषेधोऽर्थवान्। एकार्थीभावात्मकसामर्थ्यस्य समासदशायामेव सत्त्वेन विग्रहवाक्ये तद्भावेन तदानीमुक्तोपसर्जनस्याभावादिति।

''तृतीया समासे'' [24] सूत्रस्यास्य वृत्तिः कौमुद्यामेव वर्तते, ''अत्र सर्वनामता न स्यात्'' यथा-मासपूर्वाय। तृतीयासमासार्थवाक्येऽपि न यथा-मासपूर्वाय, अत्र किञ्चिदत्र सर्वादीनि सर्वनामानि इति चानुवर्तते। तृतीयायाः समासः तस्मिन् षष्ठी तत्पुरुषसमासेन पूर्वः इत्यत्र हेतौ तृतीया ''पूर्वसदृशसमानार्थमिश्रकलहनिपुणश्लक्षणैः'' इत्यनेन सूत्रेण तृतीया समासः। मासात् पूर्वमित्यर्थः, पूर्वसूत्रेणैव समासग्रहणेऽनुवर्तमाने पुनः प्रकृतसूत्रे समासग्रहणं तृतीयासमासीय लौकिकविग्रहवाक्यरूपगौणसमासस्यापि परिग्रहार्थम्।

''द्वन्द्वे च'' [25] द्वन्द्वे उक्तसंज्ञा न स्यादित्यर्थः। वर्णाश्रमेतराणां समुदायस्यैवायं निषेधः नत्ववयवानाम्। न चैवं तदन्तविधिना सुट्प्रसङ्गः सर्वनाम्नो विहितस्यामः सुडिति व्याख्यातत्वात्, सूत्रेऽस्मिन् न सर्वादीनि सर्वनामानि इति पदत्रयमनुवर्तते वर्णाश्च आश्रमाश्च इतरे च वर्णाश्रमेतराः तेषां वर्णाश्रमेतराणाम्। अत्र सर्वनामत्वाभावात् आमि सर्वनाम्नः इति सुट् न। समुदायस्यायम्-

अत्रायं भावः वर्णाश्च आश्रमाश्च इतरे च वर्णाश्रमेतराः इति समुदायस्य तदन्तविधिना ''सर्वादीनि सर्वनामानि'' इति सूत्रेण प्राप्ता सर्वनामसंज्ञा ''द्वन्द्वे च'' इति सूत्रेण निषिध्यते। इतर शब्दस्य तेन सूत्रेण प्राप्ता तु न निषिध्यते। तत्र संज्ञायां निषेधे फलाभावात् कप्रत्ययेऽकच्प्रत्यये वा रूपे विशेषाभावात्। न चैवं वर्णाश्रमेतरशब्दस्य समुदायस्याऽसर्वनामत्वेऽपि इतरस्य सर्वनामत्वे ततः परस्या आम्विभक्तेः सर्वनाम्नः सुड् इत्यनेन तदन्तविधिना सर्वनामसंज्ञाकेतरशब्दान्ताङ्गात् परत्वेन सुडागमापत्तिरिति वाच्यम्, तत्र सूत्रे सर्वनाम्नः इति पञ्चम्या विहितविशेषणत्वस्वीकारेण अवर्णान्तादङ्गात्परस्य सर्वनामसंज्ञकशब्दाद्विहितस्याडागमः सुडागमो भवतीत्यर्थलाभेनात्र इतरशब्दाद्विहितत्वाभावेन तद्प्रवृत्तेः।

''विभाषा जसि'' [26] जसाधारं यत्कार्यं शीभावाख्यं तत् कर्त्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यादित्यर्थः यथा- वर्णाश्रमेतरे वर्णाश्रमेतराः। शीभावं प्रत्येव विभाषेत्युक्तम् अतो नाकच् किन्तु क प्रत्यय एव वर्णाश्रमेतरकाः सूत्रेऽस्मिन् ''द्वन्द्वे च'', ''सर्वादीनि सर्वनामानि'' इति चत्वारि पदानि अनुवर्तन्ते। जसि इत्यविभक्तिको निर्देशः जसः इ जसिः तस्मिन् आर्षः सप्तम्या लुक्। वर्णाश्रमेतरे वर्णाश्रमेतराः, पूर्वापरे पूर्वापराः इत्यादि उदाहरणेषु वैकल्पिकत्वात् सर्वनामसंज्ञाभावपक्षे वर्णाश्रमेतराः, सति सर्वनामसंज्ञायां वर्णाश्रमेतरे इति।

''प्रथमचरमतयाल्पार्धकतिपयनेमाश्च'' [27] सूत्रस्यास्य वृत्तिं कुर्वता कौमुदीकृता इत्थं विलिखितम् एते जसः कार्यं प्रयुक्तसंज्ञा वा स्युः यथा- प्रथमे प्रथमा शेषं रामवत्। तयप्प्रत्ययस्ततस्तदन्ता ग्राह्याः। द्वितीये द्वितीयाः शेषं सर्ववत्। ''विभाषाप्रकरणेतीयस्य ङित्सूपसङ्ख्यानम्'' द्वितीयस्मै द्वितीयाय इत्यादि एवं तृतीयः, अर्थवद्ग्रहणान्नेह- पटुजातीयाय। सूत्रेऽस्मिन् विभाषा जसि सर्वनामानीत्यनुवर्तते। सूत्रेनानेन नेमशब्दस्य जसि सर्वनामसंज्ञा गणे पाठान्नित्या प्राप्ता तद्विकल्पोऽत्र विधीयते। अन्ये च ये अवशिष्टा सूत्रपठिताः प्रथमादिशब्दाः तेषां गणे पाठाभावात् सूत्रेनानेन विधीयन्ते। सूत्रे पठितशब्दानां नेमशब्दव्यतिरिक्तानां प्रथमादिशब्दानां जसोऽन्यत्र न कुत्रापि सर्वनामकार्यत्वमित्वसीयते।

''पूर्वपरावरदक्षिणोत्तरपराधराणि व्यवस्थायामसंज्ञायाम्'' [28] पूर्वापरदक्षिणोत्तरपराधराणि विभाषा जसि सर्वनामसंज्ञकाः भवन्ति व्यवस्थायामसंज्ञायामित्यर्थः। यथा- पूर्वे पूर्वाः, परे पराः, अवरे अवराः, दक्षिणे दक्षिणाः, उत्तरे उत्तराः, अधरे अधराः। सूत्रे व्यवस्थायामिति कथनेन यत्र पूर्वादयः शब्दाः दिग्देशकालवादिनः तत्रैव एतेषां सर्वनामसंज्ञा भवति। तेन दक्षिणाः, इमे गायकाः अत्र दक्षिणशब्दस्य सर्वनामसंज्ञा न भवति। अत्र दक्षिणशब्दस्य प्रवीण इत्यर्थः। असंज्ञायामिति किम्? उत्तराः कुरवः।

''स्वमज्ञातिधनाख्याम्'' [29] अज्ञातिधनानान्यवाचिनः स्वशब्दस्य विभाषा जसि सर्वनामसंज्ञा भवतीत्यर्थः। यथा- स्वे स्वाः वा पुत्राः, आत्मीया इत्यर्थः। जाति प्रतिषेधः किम्? धूमायन्तमिवाश्लिष्यं प्रज्वलन्तीव भरतर्षभः। अधनाख्यायां किम्? प्रभूताः स्वान् भुज्यन्ते। प्रभूतानि धनानि इत्यर्थः। स्वशब्दस्य चत्वारोऽर्थाः ते च- आत्मीयाः आत्मा ज्ञाति धनञ्चेति। तत्र आद्ययोरर्थयोः स्वशब्दस्य सर्वनामसंज्ञा भवति। अन्त्ययोरर्थयोश्च।

''अन्तरं बहिर्योगोपसंख्यानयोः'' [30] बहिर्योगोपसंख्यानयोः अन्तरशब्दः विभाषा जसि सर्वनामसंज्ञा भवतीत्यर्थः। बहिर्योगे- अन्तरे अन्तराः वा गृहाः नगर बाह्या चाण्डालादिगृहा इत्यर्थः। उपसंख्याने- अन्तरे अन्तरा वा शाटकाः परिधानीयाः इत्यर्थः। बहिर्योगोपसंख्यानयोरिति किम्? अनयोरग्रिमयोरन्तरं तापसः प्रतिवसति? तस्मिन्नन्तरे शीतान्यूदकानि। मध्यप्रदेशवचनोऽत्र अनन्तरशब्दः गणसूत्रस्य चेदं प्रत्युदाहरणम्। गणसूत्रेऽपि एवमेव पाठः। ''विभाषा प्रकरणे तीयस्य ङित्सूपसंख्यानम्'' तीयप्रत्ययान्तस्य ङित्सु सर्वनामसंज्ञा वा स्यादित्यर्थः। यथा- द्वितीयस्यै द्वितीयाय। तृतीयस्यै तृतीयाय। परिभाषाशास्त्रन्तु- स्ववृत्तिलिङ्चिह्नितेषु क्षेत्रेषु स्वविधेयपदस्थापनद्वारा स्वमेव अनुवर्तनं करोति। अतः अत्र सङ्केतविशेषः साक्षात् अस्य सूचको भवति। यथा- तस्मिन्नति इति परं निर्दिष्टं पूर्वञ्च पञ्चम्यन्तपदे उत्तरस्य इत्यपि।

''तस्मिन्निति निर्दिष्टे पूर्वस्य'' [31] सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यमित्यर्थः। व्यख्या- ''इको यणचि'' इत्यत्र अचि इकः यण् स्यादित्यवगतम्। तत्र अचो वर्णान्तराधिकरणत्वं न

सम्भवतीति सति सप्तम्याश्रयणीया सति इको यण् स्यादिति तत्र व्यवहिते, अव्यवहिते च इको यण् प्राप्त:। ततच समिधिमित्यत्र धकारव्यवहिते अकारे सत्यपि मकारादिकारस्य यण् स्यात्। तथा अचि सति पूर्वस्य परस्य वा इको यण् प्राप्त:। ततच तदध्युदकमित्यत्र इकारे अचि सति उकारस्य परस्यापि इको यणि स्यात्। तत्र अव्यवहित एव अचि भवति न व्यवहिते पूर्वस्यैव भवति न परस्यैत्येतदर्थमिदमारभ्यते। तस्मिन्निति न तच्छब्द: स्वरूपपर:। तथा सति ''तस्मिन्नणि च युष्माकास्माकौ'' इत्यादावेव प्रवर्तते न त्विको यणचीत्यादौ। किन्तु इको यणचीत्यादि सूत्रगतस्याऽचीत्यादि सप्तम्यन्तपदस्य तस्मिन्नित्यनुकरणम्। इतीत्यन्तरं गम्येऽर्थे इति शेष:। निरिति नैरन्तर्ये दिशिरुच्चारणे एवञ्च ''इको यणचि'' इत्येवं सप्तम्यन्तपदगम्येऽर्थे। इदमत्र सुध्युपास्य इत्यादि प्रयोगदशायां निर्दिष्टम् अव्यवहितोचरिते सति पूर्वस्य कार्यं भवति।

''तस्मादित्युत्तरस्य'' [32] पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयमित्यर्थ:। व्याख्या- ''द्व्यन्तरूपसर्गेभ्योऽप्यीत्'' ''उद: स्थास्तम्भो: पूर्वस्य'' इत्यादिसूत्रगतपञ्चम्यन्तस्याऽनुकरणं तस्मादिति, इति शब्दान्तस्त्वगम्येऽर्थे इति शेष:, निर्दिष्टेऽव्यवहितोच्चारिते सत्येव तत: परस्यैव ईत्वं परस्यैव ईत्वं भवति न तु व्यवहितोच्चारिते द्व्यादिशब्दे। नापि तत: पूर्वस्य भवतीति नियमार्थमिदं सूत्रम्।

''षष्ठी स्थाने योगा'' [33] अनिर्धारितसम्बन्धविशेषा षष्ठीस्थाने योगा बोध्या इति सूत्रार्थ:। स्थानञ्च प्रसङ्ग:। व्याख्या- अत्र शास्त्रेऽसति प्रतिबन्धके षष्ठ्यर्थ: सम्बन्ध: स्थानपदार्थानुयोगिक एव। एतस्य सूत्रस्यानुयोगनिर्णयार्थत्वादेव यत्र ''उदुपधायागोह:'' इत्यादावनुयोगिवाचकपदमुपात्तं तत्र नास्या: प्रवृत्ति: अनुयोगिमदवैयर्थ्यापत्ते:। अनुयोगिनोऽनिर्णयै: सम्बन्धविशेषस्यापि निर्णयो न स्यादिति फलितार्थकथनम्। विधिसूत्रेष्वपि पदानि अनुवर्तन्ते। यथा- ''वृद्धिरेचि'' इत्यत: वृद्धिपदम् ''एत्येधत्यूठ्सु'' [34] इत्यत्रानुवर्तते। परन्तु नियमसूत्राणां कदाप्यनुवृत्ति: न भवति, नियमस्य स्वक्षेत्रियत्वात्। अतिदेशशास्त्रेषु वर्तमानानि पदान्यपि अनुवर्तन्ते। यथा- ''स्थाननिवदादेशोऽनल्विधौ'' [35] इत्यत: स्थानिवत् इति पदस्य ''अच: परस्मिन् पूर्वविधौ'' [36] इत्यत्र सम्बन्ध:। अधिकारसूत्रस्य तु अनुवृत्त्यर्थमेव विधानम्, अत एव ''अङ्गस्य'' [37] इत्यादिना अङ्गस्य ''समर्थपदविधि:'' [38], ''प्रत्यय:'' [39], ''धातो:'' [40] इत्यादीनां बहुदूरपर्यन्तमधिकार:। एतेन पदानां स्थापनाऽपि यथायोग्यमेव करणीया। एतेन प्रदर्शितप्रकारेण अनुवर्तिनामेव व्याकरणशास्त्रस्य साधुतापूर्वकं व्याख्यानं स्थापितम्। अतिदेशसूत्राणि तेषां निमित्तमपि अनुवृत्त्यैव अवधारयन्ति। अनुवृत्तिप्रधान्यादेव सिद्धान्तकौमुद्यां कश्चित् क्रम: अवधारित: तेन अच्सन्धिप्रकरणे प्रथममेव ''इको यणचि'' इति सूत्रेण उपनिबद्धम्। अचि इति पदोपक्रान्तस्यैव व्याख्यानम् ''एचोऽयवायाव:'', ''आद्गुण:'' इत्यादिसूत्रेषु अवक्रान्तं सर्वं सुव्यवस्थापितं भवति। अनुवृत्तौ क्वचित् शब्दाधिकार:, क्वचित् अर्थाधिकार:, क्वचित् मण्डूकप्लुति:, क्वचित् स्वरितेनाधिकार:, क्वचिच्च अनुवर्तनप्रकार: चकारमूलक: व्यवस्थापित:। एतेन मन्ये अनुवृत्तीनां तद्योग्यपदानां परस्परमभिसम्बन्धस्थापनमवश्यमेव पर्यालोचनीया अन्यथा व्याकरणशास्त्रस्य सम्यक् ज्ञानम् न सेत्सयति। एतदर्थमेव अस्माकं प्रयास इति।

**संधर्व ग्रन्थ सूचि**


1. पा.सू. 7.1.21
2. पा.सू.7.2.85
3. पा.सू.1.4.84
4. पा.सू.1.4.85
5. पा.सू.1.4.86
6. पा.सू.1.4.87
7. पा.सू.1.1.24
8. पा.सू.1.1.3
9. पा.सू.1.3.11
10. पा.सू.1.1.11
11. पा.सू.1.1.27
12. पा.सू.1.1.12
13. पा.सू.1.1.12
14. पा.सू.7.1.39
15. पा.सू.1.1.14
16. पा.सू.1.1.15
17. पा.सू.1.1.16
18. पा.सू.1.1.17
19. पा.सू.1.1.18
20. पा.सू.1.1.19
21. पा.सू.1.1.27
22. पा.सू.1.1.28
23. पा.सू.1.1.29
24. पा.सू.1.1.30
25. पा.सू.1.1.31
26. पा.सू.1.1.32
27. पा.सू.1.1.33
28. पा.सू.1.1.34
29. पा.सू.1.1.35
30. पा.सू.1.1.36
31. पा.सू.1.1.66
32. पा.सू.1.1.67
33. पा.सू.1.1.49
34. पा.सू.1.1.49
35. पा.सू.1.1.89
36. पा.सू.1.1.56
37. पा.सू.1.1.57
38. पा.सू.6.4.1
39. पा.सू.2.1.1
40. पा.सू.3.1.91